श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ त्रयोविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ त्रयोविंशः सर्गः ॥

राक्षसीभिः सीतायाः प्रबोधनम्

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः।
सन्दिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह॥ **5.23.1** ॥

निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते।
राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः॥ **5.23.2** ॥

ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्छिताः।
परं परुषया वाचा वैदेहीमिदमब्रुवन्॥ **5.23.3** ॥

पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः।
दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे॥ **5.23.4** ॥

ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत्।
आमन्त्र्य क्रोधताम्राक्षी सीतां करतलोदरीम्॥ **5.23.5** ॥

प्रजापतीनां षण्णां तु चतुर्थोऽयं प्रजापतिः।
मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः॥ **5.23.6** ॥

पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः।
नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः॥ **5.23.7** ॥

तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः।
तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि॥ **5.23.8** ॥

मयोक्तं चारुसर्वाङ्गि वाक्यं किं नानुमन्यसे।
ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत्॥ **5.23.9**॥

विवृत्य नयने कोपान्मार्जारसदृशेक्षणा।
येन देवास्त्रयस्त्रिंशद् देवराजश्च निर्जितः॥ **5.23.10**॥

तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि।
वीर्योत्सिक्तस्य शूरस्य सङ्ग्रामेष्वनिवर्तिनः।
बलिनो वीर्ययुक्तस्य भार्या त्वं किं न लिप्ससे॥ **5.23.11**॥

प्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः।
सर्वासां च महाभागां त्वामुपैष्यति रावणः॥ **5.23.12**॥

समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम्।
अन्तःपुरं तदुत्सृज्य त्वामुपैष्यति रावणः॥ **5.23.13**॥

अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत्।
असकृद् भीमवीर्येण नागा गन्धर्वदानवाः।
निर्जिताः समरे येन स ते पार्श्वमुपागतः॥ **5.23.14**॥

तस्य सर्वसमृद्धस्य रावणस्य महात्मनः।
किमर्थं राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे॥ **5.23.15**॥

ततस्तां दुर्मुखी नाम राक्षसी वाक्यमब्रवीत्।
यस्य सूर्यो न तपति भीतो यस्य स मारुतः।
न वाति स्मायतापाङ्गि किं त्वं तस्य न तिष्ठसे॥ **5.23.16**॥

पुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात्।
शैलाः सुस्रुवुः पानीयं जलदाश्च यदेच्छति॥ **5.23.17**॥

**तस्य नैर्ऋतराजस्य राजराजस्य भामिनि।**
**किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ॥ 5.23.18 ॥**

**साधु ते तत्त्वतो देवि कथितं साधु भामिनि।**
**गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि ॥ 5.23.19 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः ॥